"रथाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥"
तत्र दर्व्वीकरभेदा यथा,—
"दर्व्वीकराः कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥"
एतद्विषजनितलक्षणादिकं यथा,—
"तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जड़ता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति ॥" दर्व्वीकरदष्टानां विषवेगादिकमाह यथा,—
"तत्र सर्व्वेषां सर्पाणां विषस्य सप्तवेगा भवन्ति। तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति। द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च। चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति। तेन तन्द्रा प्रसेकसन्धिविश्लेषा भवन्ति। पञ्चमे अस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्व्वभेदो हिक्कादाहश्च भवति। षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति। तेन गात्राणां गौरवमतिसारो हृत्पीड़ा मूर्च्छा च भवति। सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति। कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटिपृष्ठभङ्गश्च सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति॥"
अथ दर्व्वीकरदष्टस्य चिकित्सामाह तत्रैव।
"दर्व्विणां विषवेगे तु प्रथमे शोणितं हरेत् ।
द्वितीये मधुसर्पिर्भ्यां पाययेत्तागदं भिषक् ॥
नस्य कर्म्माञ्जने युञ्ज्यात् तृतीये विषनाशने ।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ पाययेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः ।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम् ॥
सप्तमे त्ववपीड़ेन शिरस्तीक्ष्णेन शोधयेत् ।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णशस्त्रेण मूर्द्धनि च ॥
कुर्य्यात् काकपदं चर्म्म सासृग्वा पिशितं क्षिपेत् ॥")
स्वनाकाकारके, त्रि ॥
दर्शः, पुं, (दृश्येते उभयमेवाभावपक्षस्वपात-काले न राशितांशैक्येन सहावस्थितौ चन्द्र-सूर्य्यौ यत्र । दृश् + अधिकरणे घञ् ।) अमा-वस्या । इत्यमरः । १ । ४ । ८ ॥

"अथोऽन्यं चन्द्रसूर्य्यौ तु दर्शनाद्दर्श उच्यते ॥"
इति मत्स्यपुराणम् ॥
(अयं शिनीवाल्यां विधाल्पचन्द्रा तस्मात् जातः । यथा, भागवते । ६ । १८ । ३ ।
"धातुः कुहूः शिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥"
दृश + भावे घञ् ।) अवलोकनम् । इति मेदिनी । शे, ७ ॥ (यथा, महाभारते । १३ । १४४ । ४५ ।
"दुर्द्दर्शाः केचिदाभान्ति नराः काष्ठमया इव ।
प्रियदर्शास्तथा चान्ये दर्शनादेव मैत्रकाः ॥")
पञ्चात्मकृतयागविशेषः । स यागत्रयात्मकः । यथा । "आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागास्त्रयोऽमावास्यायां स च यावज्जीवं कर्त्तव्यः कौण्डपायिकर्त्तव्यो माससाध्यश्च ।" इति मलमासतत्त्वम् ॥
दर्शकः, पुं, (दर्शयति नृपादिसमीपगमनपथमिति । दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरः । २ । ८ । ६ ॥ (जातिविशेषः । यथा, महाभारते । ६ । ६ । ५३ । [तथा ॥")
"काश्मीराः सिन्धुसौवीरा गान्धारा दर्शकाः
त्रि, दर्शयिता । (यथा, कुमारे । ६ । ५२ ।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ॥")
प्रवीणः । इति मेदिनी । के, १०३ ॥ (प्रकाशकः । यथा, हितोपदेशे । १ । ११ ।
"अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥"
दृश + ण्वुल् । द्रष्टा । यथा, महाभारते । १ । १४१ । १७ ।
"स्वकायः स्यादविवृतो नित्यं विवरदर्शकः ।
राजन्नाण्यं सपत्नेषु नित्योद्विग्नः समाचरेत् ॥")
दर्शतः, पुं, (दृश्यते गगनमार्गे इति । दृश + "भृमृदृशीति ।" उणां । ३ । ११० । इति अतच् ।) सूर्य्यः । चन्द्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (दर्शनीये, त्रि । यथा, ऋग्वेदे । १ । १४४ । ७ ।
"यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृशौ
पितु मा इव क्षयः ॥")
दर्शनं, क्ली, (दृश्यतेऽनेनेति । दृश् + करणे ल्युट् ।) नयनम् । स्वप्नः । बुद्धिः । धर्म्मः । उपलब्धिः । दर्पणः । (दृश्यते यथार्थतत्त्वमनेनेति ।) शास्त्रम् । इति मेदिनी । ने, ७३ ॥ शास्त्रन्तु षड्विधम् । वैशेषिकन्यायमीमांसासांख्यपातञ्जलवेदान्तरूपम् । एतानि तत्त्वज्ञानार्थं वेदान् विचार्य्य कणादगौतमजैमिनिकपिलपतञ्जलिवेदव्यासाख्यैर्मुनिवट्कैः कृतानि ॥ इज्या । इत्यमरः ॥ वर्णः । इति त्रिकाण्डशेषः ॥ चाक्षुषज्ञानम् । देखा इति भाषा । तत्पर्य्यायः । निर्व्वर्णनम् २ निध्यानम् ३ आलोकनम् ४ ईक्षणम् ५ । इत्यमरः । ३ । २ । ३१ ॥ निभालनम् ६ । इति जटाधरः ॥ * ॥ (यथा, शकुन्तले । १ । ६ । १४ ।

"आहूत इव मे शीघ्रं दर्शनं याति चेतसि ॥")
पुण्यदर्शनानि यथा,—
नन्द उवाच ।
"येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने ।
तत् सर्व्वं वद सर्व्वज्ञ ! श्रोतुं कौतूहलं हि मे ॥
श्रीभगवानुवाच ।
सुब्राह्मणानां तीर्थानां वैष्णवानाञ्च दर्शने ।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः ॥
सूर्य्यस्य दर्शने भक्त्या सतीनां दर्शने तथा ।
सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम् ॥
भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः ।
गजेन्द्राणाञ्च सिंहानां श्वेताश्वानान्तथैव च ॥
शुकानाञ्च पिकानाञ्च खञ्जनानान्तथैव च ।
हंसानाञ्च मयूराणां चाषानां शङ्खपक्षिणाम् ।
वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च ।
पतिपुत्रवतीनाञ्च नराणां तीर्थयायिनाम् ॥
प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः ।
मुक्तानां हीरकाणाञ्च माणिक्यानां महाशय ।
तुलसीवृक्षपुष्पाणां दर्शनं पापनाशनम् ।
फलानि शस्यधान्यानि घृतं दधि मधूनि च ॥
पूर्णकुम्भञ्च लाजाञ्च राजेन्द्रं दर्पणं जलम् ।
मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः ॥
गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम् ।
पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः ॥
देवाश्रितं देववटं सुगन्धिपवनं तथा ।
शङ्खञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः ॥
शुक्लपक्षस्य चन्द्रस्य पीयूषं चन्दनं तथा ।
कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द ! पुण्यं लभेन्नरः ॥
पताकामक्षयवटं तरुं देवोत्थितं शुभम् ।
देवालयं देवखातं दृष्ट्वा पुण्यं लभेन्नरः ॥
शुक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम् ।
गङ्गामृदं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
पुराणपुस्तकं शुद्धं सबीजं विष्णुयन्त्रकम् ।
स्निग्धदूर्व्वाक्षतं रत्नं दृष्ट्वा पुण्यं लभेन्नरः ॥
तपस्विनं सिद्धमन्त्रं समुद्रं कृष्णसारकम् ।
यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः ॥
गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोष्पदम् ।
पक्वशस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
रुचिरां पद्मिनीं श्यामां न्यग्रोधपरिमण्डलाम् ।
सुवेशाढ्यां सुवसनां दिव्यभूषणभूषिताम् ॥
वेश्यां क्षेमङ्करीं गन्धं सदूर्व्वाक्षततण्डुलम् ॥
सिद्धान्नं परमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम् ॥
कार्त्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभाम् ।
संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम् ॥
हिङ्गुलायां तथाष्टम्यामन्ने मासि सिते शुभे ।
श्रीदुर्गाप्रतिमां दृष्ट्वा करोति जन्मखण्डनम् ॥
शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम् ।
कृत्वोपवासं पूजाञ्च करोति जन्मखण्डनम् ॥
जन्माष्टमीदिने भक्तो दृष्ट्वा मां विश्वमाधवम् ।
प्रणम्य पूजां कृत्वा च करोति जन्मखण्डनम् ॥
उपोष्य व्रजभूमौ च भाद्रे च मालतीवने ।
संपूज्य राधां माघे च करोति जन्मखण्डनम् ।